# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२१)

२८.११.२०११

# पुनरावर्तनम्

- युष्मद्/अस्मद्+सु
- त्वाहौ सौ, शेषे लोपः, ङेप्रथमयोरम्
- त्व+ +अम् = त्वम्
- अह+ + अम् = अहम्

- युष्मद्/अस्मद्+औ
- युवावौ द्विवचने, प्रथमायाश्च द्विवचने भाषायाम्, ङेप्रथमयोरम्
- युव+आ+अम् = युवाम्
- आव+आ+अम् = आवाम्

# पुनरावर्तनम्

- युष्मद्/अस्मद्+जस्
- यूयवयौ जसि, शेषे लोपः, ङेप्रथमयोरम्
- यूय+  +अम् = यूयम्
- वय+  +अम् = वयम्

- युष्मद्/अस्मद्+अम्
- त्वमावेकवचने, द्वितीयायां च, ङेप्रथमयोरम्
- त्व+ आ+अम् = त्वाम्
- म+आ+अम् = माम्

# पुनरावर्तनम्

- युष्मद्/अस्मद्+औ
- युवावौ द्विवचने, द्वितीयायां च, ङेप्रथमयोरम्
- युव+आ+अम् = युवाम्
- आव+आ+अम् = आवाम्

- युष्मद्/अस्मद्+शस्
- द्वितीयायां च, शसो न
- युष्म+आ+न् = युष्मान्
- अस्म+आ+न् = अस्मान्

# ३९२. योऽचि (७.२.८९)

- पदद्वयम् । यः, अचि ।
- 'युष्मदस्मदोरनादेशे' (७.२.८६) इति अनुवर्तते ।
- अनयोः यकारादेशः स्याद् अनादेशे अजादौ परतः ।

| | | | |
|---|---|---|---|
| युष्मद् (टा) आ | | अस्मद् (टा) आ | |
| त्व अद् | आ ('त्वमावेकवचने') | म अद् | आ |
| त्वद् | आ ('अतो गुणे') | मद् | आ |
| त्वया | ('योऽचि') | | मया |

# ३९३. युष्मदस्मदोरनादेशे (७.२.८६)

- पदद्वयम् । युष्मदस्मदोः, अनादेशे ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘आ’ इति अनुवर्तते ।
- अनयोः आकारः स्याद् अनादेशे हलादौ विभक्तौ ।

- युष्मद् भ्याम् अस्मद् भ्याम्
- युव अद् भ्याम् (‘युवावौ द्विवचने’) आव अद् भ्याम्
- युवद् भ्याम् (‘अतो गुणे’) आवद् भ्याम्
- युव आ भ्याम् (‘युष्मदस्मदोरनादेशे’) आव आ भ्याम्
- युवाभ्याम् (’अकः सवर्णे दीर्घः’) आवाभ्याम्

| | | |
|---|---|---|
| युष्मद्   भिस् | | अस्मद्   भिस् |
| युष्म आ भिस् | (‘युष्मदस्मदोरनादेशे’) | अस्म आ  भिस् |
| युष्माभिस् | (‘अकः सवर्णे दीर्घः’) | अस्माभिस् |
| युष्माभिर् | (‘ससजुषो रुः’) | अस्माभिर् |
| युष्माभिः | (‘खरवसानयोर्विसर्जनीयः’) | अस्माभिः |

# ३९४. तुभ्यमह्यौ ङयि (७.२.९५)

- पदद्वयम् । तुभ्य-मह्यौ, ङयि ।
- ‘युष्मदस्मदोरनादेशे’ (७.२.८६) इत्यतः ‘युष्मदस्मदोः’ इति अनुवर्तते । ‘मपर्यन्तस्य’ (७.२.९१) इति अधिक्रियते ।
- अनयोः मपर्यन्तस्य तुभ्यमह्यौ स्तः ङयि ।

| | | |
|---|---|---|
| युष्मद् (ङे) ए | | अस्मद् (ङे) ए |
| युष्मद् अम् | ('ङेप्रथमयोरम्') | अस्मद् अम् |
| तुभ्य अद् अम् | ('तुभ्यमह्यौ ङयि') | मह्य अद् अम् |
| तुभ्यद् अम् | ('अतो गुणे') | मह्यद् अम् |
| तुभ्य् अम् | ('शेषे लोपः') | मह्य् अम् |
| तुभ्यम् | | मह्यम् |

- परमतुभ्यम् । परममह्यम् । अतितुभ्यम् । अतिमह्यम् ।
- प्राधान्ये गौणत्वे च तदन्तविधिः ।

# ३९५. भ्यसो भ्यम् (७.१.३०)

- पदद्वयम् । भ्यसः, भ्यम्/अभ्यम् ।
- 'युष्मदस्मद्भ्यां ङसोऽश्' (७.१.२७) इत्यतः 'युष्मदस्मद्भ्याम्' इति अनुवर्तते ।
- भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात् ।
- आद्यः शेषे लोपस्य अन्त्यलोपत्व एव ।
- तत्र अङ्गवृत्तपरिभाषया एत्वं न ।
- 'युष्मद् भ्यम्' - शेषे लोपः इत्यनेन अन्त्यस्य लोपे 'युष्म भ्यम्' इति स्थिते 'बहुवचने झल्येत्' इति एत्वं प्राप्नोति ।
- 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति परिभाषया न भवति ।

- अभ्यम् तु पक्षद्वयेऽपि साधुः ।
- अन्त्यलोप इति पक्षे ‘अतो गुणे’ इति पररूपेण रूपसिद्धिः ।
- टिलोप इति पक्षे युष्म् + अभ्यम् = युष्मभ्यम् ।

- युष्मद्  भ्यस्                                        अस्मद्  भ्यस्
- युष्मद्  अभ्यम्        (‘भ्यसोऽभ्यम्’)   अस्मद्  अभ्यम्
- युष्म्   अभ्यम्        (‘शेषे लोपः’)     अस्म्   अभ्यम्
- युष्मभ्यम्                                        अस्मभ्यम्

# ३९६. एकवचनस्य च (७.१.३२)

- पदद्वयम् ।
- 'युष्मदस्मद्भ्यां ङसोऽश्' (७.१.२७) इत्यतः 'युष्मदस्मद्भ्याम्' इति, 'पञ्चम्या अत्' (७.१.३१) इति पूर्णं च अनुवर्तते ।
- आभ्यां पञ्चम्येकवचनस्य अत् स्यात् ।

- युष्मद् (ङसि) अस् अस्मद् (ङसि) अस्
- युष्मद् अत् ('एकवचनस्य च') अस्मद् अत्
- त्व अद् अत् ('त्वमावेकवचने') म अद् अत्
- त्वद् अत् ('अतो गुणे) मद् अत्
- त्व् अत् ('शेषे लोपः') म् अत्
- त्वत् मत्
- 'ङसेश्च' इति सुवचम् ।

# ३९७. पञ्चम्या अत् (७.१.३१)

- पदद्वयम् । पञ्चम्याः, अत् ।
- ‘युष्मदस्मद्भ्यां ङसोऽश्’ (७.१.२७) इत्यतः ‘युष्मदस्मद्भ्याम्’ इति, ‘भ्यसोऽभ्यम्’ (७.१.३०) इत्यतः ‘भ्यसः’ इति च अनुवर्तते ।
- आभ्यां पञ्चम्या भ्यसः अत् स्यात् ।

- युष्मद्   भ्यस्                                        अस्मद्  भ्यस्
- युष्मद्   अत्(‘पञ्चम्या अत्’)                    अस्मद्  अत्
- युष्म्     अत्    (‘शेषे लोपः’)          अस्म्    अत्
- युष्मत्                                        अस्मत्

# ३९८. तवममौ ङसि (७.२.९६)

- पदद्वयम् । तव-ममौ, ङसि ।
- 'युष्मदस्मदोरनादेशे' (७.२.८६) इत्यतः 'युष्मदस्मदोः' इति अनुवर्तते । 'मपर्यन्तस्य' (७.२.९१) इति अधिक्रियते ।
- अनयोः मपर्यन्तस्य तवममौ स्तः ङसि ।

# ३९६. युष्मदस्मद्भ्यां ङसोऽश् (७.१.२७)

- पदत्रयम् । युष्मद्-अस्मद्भ्याम्, ङसः, अश् ।
- स्पष्टम् ।

| | | | | |
|---|---|---|---|---|
| युष्मद् | (ङस्) अस् | | अस्मद् | (ङस्) अस् |
| युष्मद् | अ | ('युष्मदस्मद्भ्यां ङसोऽश्') | अस्मद् | अ |
| तव अद् | अ | ('तवममौ ङसि') | मम अद् | अ |
| तवद् | अ | ('अतो गुणे') | ममद् | अ |
| तव् | अ | ('शेषे लोपः') | मम् | अ |
| तव | | | मम | |

- युष्मद्   ओस्                                            अस्मद्   ओस्
- युव अद्  ओस्   ('युवावौ द्विवचने')  आव  अद्    ओस्
- युवद्              ओस्            ('अतो गुणे')          आवद्  ओस्
- युवयोस्        ('योऽचि')                आवयोस्
- युवयोः                                        आवयोः

# ४००. साम आकम् (७.१.33)

- पदद्वयम् । सामः, आकम् ।
- 'युष्मदस्मद्भ्यां ङसोऽश्' (७.१.२७) इत्यतः 'युष्मदस्मद्भ्याम्' इति अनुवर्तते ।
- आभ्यां परस्य साम आकम् स्यात् ।
- सकारेण सहितः आम् साम् । 'आमि सर्वनाम्नः सुट्' इति अदन्तात् सर्वनाम्नः परस्य आमः सुडागमो विधीयते ।
- 'युष्मद् आम्' इति स्थिते अदन्तत्वाभावेन सुटः प्रसक्तिः न ।
- शेषे लोपेन अन्त्यलोपे कृते एव अदन्तत्वप्रसक्तिः । किन्तु आकम्-आदेशात् प्राक् शेषे लोपः इत्यस्य प्रवृत्तिः न ।
- एवं तर्हि किमर्थः ससुट्कनिर्देशः?

- भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः ।
- शेषे लोपः इति अन्त्यलोप इति पक्षे एव अयम् ।
- यदि तु शेषस्य लोप एवाश्रीयते, तदा कृतेऽपि आकमादेशे अदो लोपे अवर्णात् परत्वाभावादेव सुटः प्रसक्त्यभावात् ससुट्कनिर्देशो मास्तु ।

| | |
|---|---|
| युष्मद् आम् | अस्मद् आम् |
| युष्मद् आकम् (‘साम आकम्’) | अस्मद् आकम् |
| युष्म् आकम् (‘शेषे लोपः’) | अस्म् आकम् |
| युष्माकम् | अस्माकम् |

- युष्मद् (ङि) इ अस्मद् (ङि) इ
- त्व अद् इ ('त्वमावेकवचने') म अद् इ
- त्वद् इ ('अतो गुणे') मद् इ
- त्वयि ('योऽचि') मयि

- युष्मद् (सुप्) सु अस्मद् (सुप्) सु
- युष्म आ सु ('युष्मदस्मदोरनादेशे') अस्म आ सु
- युष्मासु ('अकः सवर्णे दीर्घः') अस्मासु